


भवानन्दविरचितः


दशलकारविचारः

(अतिलघुग्रन्थः)

सम्पादकः

हरेरामत्रिपाठी



प्रथमान्तिमपृष्ठयोः मूलपाण्डुलिपिः

भवानन्दविरचितः

दशलकारविचारः

भूमिका

हरेरामत्रिपाठी

आकाङ्क्षासत्तियोग्यताविशिष्टपदप्रयोज्यः यः तत्तदर्थसंसर्गावगाही बोधोऽनुभवो जायते तादृशः शाब्दबोधः तत्तत्पदोपस्थाप्यस्यैव अर्थस्य अवगाहित्वात् प्रत्यक्षानुमितिभ्यां भिन्ना प्रमा एव। तस्यां प्रमायां पदज्ञानं करणं भवति पदार्थोपस्थितिः व्यापारः शक्ति ज्ञानञ्च सहकारिकारणं भवति। आकांक्षा पदनिष्ठा योग्यता अर्थनिष्ठा च भवति। सार्थकपदानां समूहो वाक्यमिति। यः शब्दान्तरसहकारेण स्वस्वघटकान्यतरवृत्त्युपस्थाप्य यादृशार्थान्वयबोधजनकः स च शब्दः सार्थको भवति। स च प्रकृतिप्रत्ययनिपातभेदेन[१] त्रिविध इति यादृशार्थकप्रकृतिनिपातभिन्नः यादृशार्थे प्रशस्तशक्तिनिरूढलक्षणात्मक-वृत्तिमांश्च यादृशः शब्दः स तादृशार्थबोधकः प्रत्ययो चतुर्विधो भवति। विभक्तिः धात्वंशः तद्धितं कृदिति प्रत्ययो भवति। तत्र एकद्वित्र्यादिविशिष्टार्थशक्तिमान् प्रत्ययो विभक्तिस्सुप्तिङ्भेदेन द्विधा इति। स्वभिन्नप्रथमान्तस्य नाम्नोऽर्थे स्वार्थसंख्याबोधं प्रति समर्थाः प्रत्ययाः तिङ उच्यन्ते। ताश्च तिङः लट्, लोट्, लिङ्, लङ्, लुङ्, लिट्, लुट्, आशीर्लिङ्, लृट्, लृङ्[२] भेदेन दशविधाः भवन्ति। जगदीशभट्टाचार्यमते लकाराणां लक्षणं निरूपयिष्यामि। जगदीशमते तिङः लक्षणन्तु स्वभिन्न[३]प्रत्ययान्त-नामार्थधर्मिकस्वार्थसंख्याप्रकारकान्वयबोधजनकतावच्छेदकप्रकारताश्रयानुपूर्वीम-त्प्रत्ययत्वमिति। यद्वा यादृशानुपूर्वीप्रकारकज्ञानत्वं स्वाश्रयार्थभिन्नार्थावच्छिन्न-स्वाश्रयार्थावच्छिन्नविशेष्यकशाब्दबोधजनकतानवच्छेदकं तादृशानुपूर्वीमत्प्रत्ययत्वं[४] तिङः लक्षणम्। धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोधसमर्थः शब्दः वाख्यातं, तदेव च तिङित्यर्थाल्लभ्यते[५] इति। अर्थात् यादृशानुपूर्वीप्रकारकज्ञानत्वं धात्वर्था-वच्छिन्नस्वाश्रयार्थविधेयकान्वयबोधजनकतावच्छेदकं तादृशानुपूर्वीमच्छब्दत्वं तिङः शक्यतावच्छेदकम् एवञ्च तिङः शक्यो यत्न एव इति जगदीशभट्टाचार्यस्य आशय इति। आख्यातार्थः कालः संख्या चापि तयोः प्रकारान्तरालभ्यत्वात्।

यादृशानुपूर्व्यवच्छिन्ननिष्ठस्वाश्रयार्थधर्मिकातीतप्रकारकान्वयबोधजनक-त्वानधिकरणत्वं स्मशब्दसमभिव्यवहाराभावप्रयोज्यं तादृशानुपूर्वीमत्तिङ्त्वं लट्त्वमिति।[६]

इयञ्च परस्मैपदात्मनेपदभेदेन द्विविधेति। एवं लोडाद्याः इदृशो द्विविधाः भवन्ति। आख्यातसामान्यस्य वर्तमानत्वमर्थः। वर्तमानत्वं हि पचतीत्यादौ धात्वर्थे

तदुनकूलस्वार्थकृत्यादौ वा लडादिनाऽनुभाव्यते। क्वचिद् वर्तमानसामीप्यमपि लटोऽर्थः।[७] वर्तमानसमीप्यञ्च द्विविधं वर्तमानक्षणाव्यवहितोत्तरकालावच्छेद्यत्वम् तादृश-क्षणाव्यवहितप्राक्कालावच्छेद्यत्वञ्च। अव्यवहितत्वञ्च स्वध्वंसाधिकरणसमयध्वंसानधि-करणत्वे सति प्रागभावध्वंसान्यतरसम्बन्धेन स्वाधिकरणत्वं तादृशाधिकरणत्वं वेति। यादृशानुपूर्वीप्रकारकज्ञानं स्वाश्रयार्थकर्तृत्वधर्मिकक्यजन्तधात्वर्थप्रकारकान्वयबोधजनकं तादृशानुपूर्वीमदाख्यातत्वम्। उभयपदिधातूनां यत्र क्रियाफलं कर्तृनिष्ठं तत्रात्मनेपदम्, यत्र च कर्तृभिन्ननिष्ठं तत्र परस्मैपदमिति साधु इति जगदीशभट्टाचार्याः वदन्ति। जगदीशमते तु 'सम्प्रति पचति' इत्यत्र वर्तमानत्वं न कालवृत्तित्वमपि तु तत्तत्काल-वृत्तित्वमनन्तत्वमेव। यत्नत्वावच्छिन्नस्यैव[८] आख्यातार्थं प्रतिपादयति गदाधरः। अत एवोच्यते "ईश्वरकृतिसाधारणयत्नत्वावच्छिन्न एव वाख्यातार्थः। असाधारणानुकूलत्वं हि यत्ने क्रियायाः सम्बन्धतया भासते इति। दीधितिकारनये गच्छति, जानाति, करोति इत्यादौ आख्यातस्य आश्रयत्वे निरूढा लक्षणा भवति। केचित्तु तिबादि-स्थानिनः लकारस्यैव तत्त्वजातिविधया कृति वाचकतेति। कर्तृकर्मवत् कालविशेषेऽनु-शिष्टाः लडादयः कालविशेषमपि बोधयन्ति इति गदाधरभट्टाचार्याः। अस्मिन्नयेऽपि वर्तमानकाले एव लट्प्रत्ययस्य शक्तिरस्ति। वर्तमानकालश्च पचति इति प्रयोगाधिकरणकालरूपः पचति इति पदघटकाख्यातार्थः। स्वप्रागभावानधिकरण-स्वाश्रयकर्तृकप्रकृतक्रियानाशप्रागभावाधिकरणशब्दप्रयोगाधिकरणकाल एव वर्तमानकालः[९] यद्वा शब्दप्रयोगाधिकरणवृत्तिकालत्वव्याप्यधर्मत्वेनोपलक्षणेनाऽनुगतीकृततत्तत्क्षण-दिनमासवर्षत्वाद्यवच्छिन्ने एव काले लटः शक्तिरिति[१०] गदाधराः। यादृशानुपूर्वी-प्रकारकज्ञानं स्वाश्रयवक्त्रनुमतत्वप्रकारकधात्वर्थविशेष्यकान्वयबोधजनकं तादृशानु-पूर्वीमदाख्यातत्त्वं लोट्लकारस्य लक्षणम्। अत एव जगदीशः आह–

स्ववक्त्रनुमतत्वस्य धात्वर्थेऽन्वयबोधने।
अनुकूला यादृशी तिङ् सैव लोट् परिभाष्यते॥[११]

'पत्नी पचतु' इत्यत्र अनुज्ञैव लोडर्थः, सा च कर्त्तुरिष्टत्वे सति वक्त्रनुमतत्वम्। 'शूलं विश', 'विषं भुक्ष्व' इत्यत्र नानुज्ञा लोडर्थः किन्तु आज्ञैव। क्वचिद् वक्त्राशंसनमपि लोडर्थः इति जगदीशभट्टाचार्या इति। लोडर्थः विधिः, स च प्रवर्तकज्ञानविषयो धर्मः, स च न्यायनये कृतिसाध्यत्वं बलवदनिष्टाननुबन्धित्वसहितमिष्टसाधनत्वञ्च। इष्टत्वञ्च समभिव्याहृतपदोपस्थापितकामनाविषयत्वम् इति गदाधरग्रन्थस्याशयः।

लट्लोट्भिन्नत्वे यादृशानुपूर्वीज्ञानत्वं विध्यन्वयबोधजनकतावच्छेदकं तादृशानुपूर्वीमत् तिङ्त्वं लिङः[१२] लक्षणम्।

विधिस्तु प्रवर्तकचिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वमिति। तादृशञ्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वञ्च प्रत्येकमेव। प्रवर्तकचि-

कीर्षाजनकतावच्छेदकप्रकारताश्रयत्वम् विधित्वमिति। पङ्गुः समुद्रः न तरेदित्यत्र कृतिसाध्यत्वं लिङर्थः। यत्तु मते कृतिसाध्यत्वबलवदनिष्टाजनकत्वाभ्यां विशिष्टमेव इष्टसाधनत्वं लिङर्थः। 'विश्वजिता यजेत' इत्यत्र साधनत्वमात्रं विध्यर्थः।

रत्नकोशकारमते[१३] तु पाकादिकृतित्वावच्छिन्नोद्देश्यताकेच्छाया एव पाकादि-चिकिर्षात्वात् सैव पाकादौ प्रवर्तिका, तस्याञ्च पाकादिकृतित्वावच्छिन्नधर्मिकेष्ट-साधनताज्ञानत्वेन हेतुत्वात् कृतिगतम् एव इष्टसाधनत्वं लिङर्थः। तथाच स्वर्गकामो यजेतेत्यत्र इष्टसाधनीभूतयागकृतिमान् स्वर्गकामः इति शाब्दबोधो भवति। परे तु साध्यताविशिष्टमेव विध्यर्थः। नियतोत्तरवर्तितावच्छेदकधर्मवत्तालक्षणसाध्यताघटक-प्रत्येकवस्तुन्येव लिङादेः शक्तिः। अन्ये तु साध्यमात्रं विध्यर्थः इति वदन्ति। प्राभाकरास्तु कार्ये एव लिङः शक्तिरिति। श्राद्धे भुञ्जीत भवान्, 'इह भुञ्जीथास्त्वम् च' इत्यत्र श्राद्धे भोजनाय निमन्त्रितो भवान् इत्यनुभवात् निमन्त्रितत्वमेव लिङर्थः[१४]। तच्च स्वकर्त्तव्यत्वप्रकारकधीजनकवाक्यप्रतिपाद्यत्वमिति। धेनुं दद्यास्त्वमस्मभ्यमित्यत्र प्रार्थना[१५] लिङर्थः। तच्च स्वसम्प्रदानकदानधर्मिकसम्बोध्यकर्त्तव्यत्वप्रकार-कवक्त्रिच्छाविषयत्वम्। 'भिक्षां देहि त्वमर्थिभ्यः' इत्यत्र लोडपि प्रार्थनावाचकमिति। 'ह्रदो यदि धूमवान् स्यादि'त्यत्र लिङर्थः आश्रयत्वम्। क्वचिद् पौर्वापर्यमात्रं लिङर्थः।[१६] 'ऋतौ स्वदारानुपेयादि'त्यत्र इष्टसाधनत्वं विध्यर्थः। यद्वा प्रत्यवायहेतुत्वमभावश्च द्वयं लिङर्थः। "पञ्च पञ्चनखान् भुञ्जीत" इत्यत्र परिसंख्याविधौ प्रत्यवायहेतुत्वं लिङर्थः। गदाधरास्तु आहुः लिङर्थः विधिः। परप्रवृत्त्यर्थं तस्य प्रयोगो भवति। प्रवर्तनाज्ञानविषयो धर्मः विधिः। स च कृतिसाध्यत्वं, बलवदनिष्टाननुबन्धि-त्वसहितमिष्टसाधनत्वञ्च। अपरे तु 'चैत्यं न विन्देत' इत्यत्र इष्टसाधनत्वं विध्यर्थः न तु कृतिसाध्यत्वम्। 'न कलञ्जं भक्षयेदि'त्यत्र निषेधविधेः प्रामाण्यानुरोधेन बलवदनिष्ठाननुबन्धित्वं विध्यर्थः। 'पूयेनेन अभिचरन् यजेत' इत्यत्र यत्तु मते बलवद्दुःखाऽजनकत्वमिति विध्यर्थ इति।

लङं लक्षयन्नाह जगदीशभट्टाचार्यः—

या स्मयोगे विना धातोः शबन्तस्यार्थधर्मिके।
अतीतत्वग्रहे हेतुस्तादृशी तिङ् लङुच्यते।।[१७]

अर्थात् स्मशब्दसमभिव्याहाराभावविशिष्टयादृशानुपूर्वीप्रकारकज्ञानत्वं शबन्तधात्वर्थधर्मिकातीतत्वप्रकारकशाब्दधीजनकतावच्छेदकं तादृशानुपूर्वीमत्तिङ्त्वं लङः लक्षणम्। अपचदित्यत्र लङः अतीतः काल इव तन्निष्ठं ह्यस्तनत्वमप्यर्थः, तच्च पूर्वदिनवृत्तित्वमिति कौमाराः[१८]। ह्यस्तनत्वं लङः नार्थः अपितु अद्यतनभिन्नत्वमिति अनद्यतने लङिति पाणिनेरनुशासनात् इत्यपरे वदन्ति। गदाधरभट्टाचार्यास्तु अतीतत्वे

सति अनद्यतनत्वं लङर्थ[१९] इति वदन्ति। अनद्यतनत्वं प्रकृतशब्दप्रयोगाधिकरणादिनाऽवृत्तित्वम्। अथवा स्वातन्त्र्येणाऽनद्यतनत्वं न लङर्थः परन्तु तादृशदिनाद्यक्षणवृत्तिध्वंसप्रतियोगित्वरूपमनद्यतनातीतत्वं विशिष्टमेव। अर्थात् शब्दप्रयोगाधिकरणदिनं तस्य य आद्यक्षणस्तद्वृत्तिध्वंसप्रतियोगित्वमनद्यतनातीतत्वं तदेव लङर्थः। आद्यक्षणवृत्तिध्वंससङ्ग्रहणेन वर्तमानदिने कृते नष्टेऽपि पाके "अपचत्" इति प्रयोगापत्तिः न सम्भवति।

लुङं लक्षयति जगदीशः—

हन्तेः कृतवधेरर्थे याऽतीतत्वस्य बोधिका।
सिजन्तस्याथवा धातोस्तादृशी तिङ् लुङोच्यते॥[२०]

अर्थात् यादृशानुपूर्वीप्रकारकज्ञानत्वं कृतवध्यादेशहन्त्यर्थधर्मिकस्य सिजन्तधात्वर्थधार्मिकस्य वा अतीतत्वप्रकारकबोधस्य जनकतावच्छेदकं तादृशानुपूर्वीमत्तिङ्त्वं लुङत्वमिति। 'अपाक्षीत्' इत्यत्र अतीतः काल इव तन्निष्ठमद्यतनत्वमपि लुङामर्थः। तेन उक्तस्थले वर्तमानध्वंसप्रतियोग्यद्यतनपाककृतिमान् इति शाब्दबोधो भवति। गदाधरेणोच्यते—

अपाक्षीदित्यत्र लुङोऽतीतकालोऽर्थः,[२१] तस्य आधेयत्वसम्बन्धेन आख्यातसामान्यार्थकृत्यादौ अन्वयो भवति। लुङोऽतीतकालार्थत्वे हि अतीतत्वं काले विशेषणमस्ति। सम्प्रति काले अविशेषणीभूतमेव अतीतत्वमात्रं लुङर्थः इति। अतीतत्वस्य आश्रयता सम्बन्धेन कृतौ अन्वयो भवति। अतीतत्वं नाम वर्तमानध्वंसप्रतियोगित्वम्। अर्थात् वर्तमानो योऽतीतकृतिध्वंसः तत्प्रतियोगित्वं यदतीतकृतौ अस्ति तदेवातीतत्वमिति। गदाधरमते वर्तमानध्वंस एव लुङाद्यर्थः तस्य प्रतियोगितासम्बन्धेन कृतावेवान्वयो भवति। वर्तमानध्वंसस्य स्वविशिष्टकालवृत्तिकृतिजन्यपाकाननुकूलत्वविशिष्टप्रतियोगितासम्बन्धेन कृतौ अन्वयः बोधव्यः।

वस्तुतस्तु अन्त्यकृतिध्वंसस्य लुङर्थत्व[२२] स्वीकार्यम्। एवञ्च वर्तमानपाकानुकूलान्त्यकृतेः पाकवर्तमानतादशायां ध्वंसो न जात इति न तदानीम् अपाक्षीदिति प्रयोगापत्तिः इति श्रीगुरवः।

यादृशानुपूर्वीप्रकारकज्ञानत्वं द्विरुक्तान्यधर्मिकस्वार्थप्रकारकान्वयबोधजनकतानवच्छेदकं तादृशानुपूर्वीमत्तिङ्त्वं लिटः लक्षणमिति। अत एव जगदीशभट्टाचार्यैरुक्तम्—

द्विरुक्तभिन्नधात्वर्थे स्वार्थस्यान्वयबोधने।
या न योग्या तादृशी तिङ् लिट्पदेनाभिधीयते॥[२३]

द्विरुक्तयजधात्वर्थधर्मिकस्य आमन्तचकासधात्वर्थधर्मिकस्य वा स्वार्थप्रकार-कान्वयबोधस्य जनकतावच्छेदकं यादृशानुपूर्वीप्रकारकज्ञानत्वं तादृशानुपूर्वीमत्तिङ्त्वं लिटः लक्षणम्।[२४] मनश्चचाल, सुरभिभाग आजगाम" इत्यादौ अतीतः काल इव धात्वर्थनिष्ठं परोक्षत्वमपि लिटोऽर्थः तच्चातीन्द्रियत्वम्। अतीतत्वमनद्यतनत्वं परोक्षत्वञ्च लिटोऽर्थः इति गदाधरभट्टाचार्याः इति। कुत्रचित् परोक्षत्वसत्त्वेऽपि परोक्षत्वाविवक्षया न लिट्। परोक्षत्वञ्च वक्तुः साक्षात्काराविषयत्वम्।[२५] केचित्तु मते वक्तृभिन्नकर्तृकत्वमेव परोक्षत्वमिति।[२६] एवञ्च "व्यातेने किरणावलीमदुयनः सत्तर्कतेजोमयीम्" इति उदयनाचार्यस्य श्लोके व्यातेने इति लिट् न साधुरिति वैयाकरणाः। तन्न णलुत्तमो वा इति सूत्रेण अपरोक्षत्वेऽपि लिट् भवति इति ज्ञापितम्। अतः क्रियायाः अपरोक्षत्वेऽपि लिट् साधुरिति वर्धमानोपाध्यायैरुक्तम्। ज्ञापकत्वञ्च वक्तृभिन्नकर्तृकत्वरूपपरोक्षत्वस्य क्रियायां सत्त्वे एव लिडिति। मतेऽस्मिन् अस्वारस्यं द्योतयन्नाह गदाधरः इत्याहु[२७]रिति। परोक्षत्वविवक्षैव लिटः साधुतानियामिका इति गदाधरग्रन्थस्याशयः।

"धात्वर्थे श्वस्तनत्वस्य बोधिका तिङ् लुडुच्यते"[२८] इति जगदीशः। यादृशानुपूर्वीप्रकारकज्ञानत्वं धात्वर्थधर्मिकश्वस्तनत्वप्रकारकान्वयबोधजनकतावच्छेदकं तादृशानुपूर्वीमत् तिङ्त्वम् श्वस्तनत्वम् लुटः लक्षणम्। लृडादयस्तु धात्वर्थे भवित्वमेव बोधयन्ति न श्वस्तनत्वमपि इति जगदीशभट्टाचार्याः इति। गदाधरस्तु लुटः अनद्यतनभविष्यत्वमर्थः। अनद्यतनभविष्यत्वञ्च शब्दप्रयोगाधिकरणदिवसाऽवृत्तित्वे सति शब्दप्रयोगकालीनप्रागभावप्रतियोगित्वम्। शब्दप्रयोगाधिकरणदिवसध्वंसोत्पत्तिकत्वं वा।[२९] केचित्तु भविष्यत्वमेव लुडर्थः, क्रियायाः कृतेर्वा स्वरूपसद् अनद्यतनत्वमेव लुट्साधुतानियामकमिति। शब्दप्रयोगाधिकरणदिवसावृत्तित्वे सति शब्दप्रयोगकालीन-प्रागभावप्रतियोगित्वम्, वा शब्दप्रयोगाधिकरणदिवसध्वंसोत्पत्तिकत्वम् लुङर्थ इति।

आशीर्लिङाशंसनस्य भावित्वस्य च बोधिका[३०] इति जगदीशो वदति। अर्थात् यादृशानुपूर्वीप्रकारकज्ञानत्वं धात्वर्थधर्मिकस्याशंसनप्रकारकस्य भावित्वप्रकारकस्य च बोधजनकतावच्छेदकं तादृशानुपूर्वीमत्तिङ्त्वमाशीर्लिङ्त्वमिति। यद्यपि लोटलकारः आशंसनीयत्वबोधकः तथापि तत्र भावित्वं नास्ति। जीविष्यति इत्यत्र लृटः भावित्व-बोधकत्वेऽपि आशंसनीयत्वाभावात् आशीर्लिङार्थ एव आशंसनस्य भावित्वमिति।

यादृशानुपूर्वीप्रकारकज्ञानत्वं धात्वर्थविगमधर्मिकभाविकालावच्छेद्यत्वप्रकारक-बोधजनकतावच्छेदकं तादृशानुपूर्वीमत्तिङत्वं लृटः,[३१] लक्षणम्। अत एव जगदीशैरुक्तम् "क्रियातिपाते[३२] कालस्य भाविनः वैशिष्ट्यबोधिका या तिङ् लृट्" इति। या तिङ् क्रियायाः धात्वर्थस्यातिपाते विगमे भाविकालावच्छेद्यत्वस्य बोधिका तादृशी लृट्" इति। भाविकाल इव क्रियाप्रतियोगिको भावोऽपि लृडर्थः।[३३] भविष्यत्वं लृडर्थ इत्यपि केचित्। काशिकानुसारं शेषे शुद्धे भविष्यति काले चकारात् क्रियायां चोपपदे

क्रियार्थायां धातोर्लृट्प्रत्ययो[३४] भवति। भविष्यत्त्वञ्च विद्यमानप्रागभावप्रतियोग्युत्पत्तिकत्वम्। वैयाकरणास्तु भविष्यत्त्वं वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम् इति वदन्ति।[३५]

गदाधरास्तु "पक्ष्यति" "ज्ञास्यति" इत्यत्र क्रियायां भविष्यत्त्वं लृडर्थः भासते इति वदन्ति। अनन्तरं तेनैवोक्तम् वर्तमानप्रागभावप्रतियोगित्वं प्रतियोगितासम्बन्धेनाऽन्वयी वर्तमानप्रागभावो वा लृट्प्रत्ययार्थः। प्रागभावानङ्गीकारे वर्तमानकालध्वंस एव लृडर्थः। वर्तमानत्वञ्च शब्दप्रयोगाधिकरणक्षणवृत्तित्वमिति।

"क्रियातिपाते कालस्य प्राक्तनस्य वैशिष्ट्यबोधिका[३६] या तिङ् लृङ्" इति जगदीशभट्टाचार्यः। अर्थात् यादृशानुपूर्वीप्रकारकज्ञानत्वं धात्वर्थधर्मिकातीतकालावच्छेद्यत्वप्रकारकबोधजनकतावच्छेदकं तादृशानुपूर्वीत्तिङ्त्वं लृङः[३७] लक्षणम्। अनागतत्वे सति अनद्यतनकालत्वं लृङः लक्षणम् वा प्रकृतशब्दप्रयोगाधिकरणदिनध्वंसनिष्ठानवच्छिन्नावच्छेदकताकत्वरूपमिति। अवच्छेद्यावच्छेदकभावश्च सम्बन्धविधया भासते। उक्तविशिष्टध्वंस एव लृङाद्यर्थ इति। क्वचित् भूतत्वं क्वचित् तु भविष्यत्त्वं लृङर्थ[३८] इत्यपि जगदीशः। हेतुहेतुमतोर्लिङ् इत्येवमादिकं लिङो निमित्तम्। तत्र लिङ्निमित्ते भविष्यतिकाले लृङ्प्रत्ययो भवति क्रियातिपत्तौ सत्यामिति वैयाकरणः वदन्ति।[३९] यथा 'सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत्' इति।

भवानन्दविरचितदशलकारविचारमाश्रित्य लकाराणां स्वरूपं प्रतिपादयामि। पचतीत्यत्र लट्लकारस्य वर्तमानत्वविशिष्टकाले शक्तिः, पक्ष्यति इत्यत्र लृट्लकारस्य वर्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्त्वे शक्तिः, अपाक्षीत् इत्यत्र लुङ्लकारस्य वर्तमानध्वंसप्रतियोगित्वरूपे अतीतत्वे शक्तिश्च स्वीक्रियते। लट्लकारस्य तत्तच्छब्दप्रयोगाधिकरणक्रियादिरूपकालोपाधिवृत्तित्वे शक्तिः न स्वीक्रियते। नापाक्षीदित्यत्र अतीतत्वं लुङर्थः, तच्च तादृशकृत्यभावे भासते। एवं न पक्ष्यतीत्यत्र अनागतत्वं लृडर्थः तच्च तादृशकृत्यभावे भासते इति। अतीतत्वं नाम अतीतकालावच्छिन्नत्वम्। अनागतत्वञ्चानागतकालावच्छिन्नत्वमिति। वर्तमानसामीप्यमपि क्वचिल्लडर्थः। तच्च भविष्यद्वृत्तिवर्तमानध्वंसोत्पत्तिकक्षणोत्पत्तिकक्रियादिवृत्तित्वरूपम् यद्वा अतीतवृत्तिवर्तमानक्षणोत्पत्तिकध्वंसप्रतियोगिक्रियादिवृत्तित्वरूपमिति। लुङो वर्तमानध्वंसप्रतियोगित्वरूपमतीतत्वमर्थः। लङर्थस्तु एतद्विनोत्पत्तिकभिन्नत्वे सति वर्तमानध्वंसप्रतियोगित्वरूपमतीतत्वम्। पाणिनिसूत्रानुसारं शब्दप्रयोगाधिकरणदिनोत्पत्तिकभिन्नत्वे सति अतीतत्वं लङर्थो बोध्यः। परोक्षत्वे सति अतीतत्वं लिडर्थः। परोक्षत्वञ्च तद्वक्तृभिन्नकर्तृकत्वमिति। लृटो लुटश्च भविष्यत्वमर्थः। तच्च वर्तमानप्रागभावप्रतियोगित्वरूपमिति। क्रियातिपत्तौ लृङर्थः भविष्यत्त्वं हेतुहेतुमद्भावोऽतिपत्तिश्च। अन्ये तु हेतुहेतुमद्भाववत्त्वं यथायथमतीतत्वमनागतत्वञ्च लृङर्थः। अनेन प्रकारेण दशलकाराणां स्वरूपं

न्यायशास्त्रेष्वुपलभ्यते।

"भवानन्दकृतदशलकारविचारः" इति दुर्लभा पाण्डुलिपिः विद्यते। इदानीं यावदस्याः प्रकाशनं नाभवदिति। इयं पाण्डुलिपिः श्रीरघुनाथमन्दिर-[४०] पुस्तकालयतः जम्मूतः लब्धा इति।

दशलकारविचारस्य प्रणेता भवानन्दतर्कवागीशो विद्यते। अस्य ग्रन्थस्य मूला पाण्डुलिपिः रघुनाथमन्दिरपुस्तकालय[४१] जम्मूतः मया लब्धा। अस्य ग्रन्थस्य अन्या अपि पाण्डुलिपयः सन्ति। तासां विवरणमधोलिखितरूपेण प्रस्तूयते–

क्रसं	ग्रन्थाङ्काः	ग्रन्थनाम	पत्रम्	लिपिः	विवरणम्	स्थानम्
१.	३०६८०	दशलकारमञ्जरी	६	देवनागरी	पूर्णम्	[क]सरस्वतीभवनपुस्तकालयः, वाराणसी
२.	३३४४४	दशलकारवादार्थः	६	देवनागरी	पूर्णम्	सरस्वतीभवनपुस्तकालयः, वाराणसी
३.	३१५५९	दशलकारविचारः	६	बङ्गः	पूर्णम्	सरस्वतीभवनपुस्तकालयः, वाराणसी
४.	३३७५९	दशलकारसारमञ्जरी	३	बङ्गः	पूर्णम्	सरस्वतीभवनपुस्तकालयः, वाराणसी
५.	३०६४६	दशलकारार्थमञ्जरी	४	देवनागरी	पूर्णम्	सरस्वतीभवनपुस्तकालयः, वाराणसी
६.	९७२७०	दशलकारार्थमञ्जरी	५	देवनागरी	पूर्णम्	सरस्वतीभवनपुस्तकालयः, वाराणसी

उपर्युक्तपाण्डुलिपेः प्राचुर्य्यत्वादस्य प्राशस्त्यं ज्ञातुं शक्यते। अस्य लघुग्रन्थस्य अतिसंक्षिप्तत्वेऽपि वैयाकरणानां नैयायिकानाञ्च कृते लकारार्थज्ञानेऽत्युपकारं भविष्यतीति मे मतिः।

पादटिप्पणी–

१. शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत्।
प्रकृतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा।। श.शक्ति प्रका.का-६, पृ. २९

२. लकारस्य अयं क्रमः शब्दशक्तिप्रकाशिकाग्रन्थमाश्रित्यैव मया कृतः, व्याकरणदृष्ट्या तु लकारस्य क्रमः भिन्नो विद्यते।

३. स्वेतरप्रथमान्तस्य नाम्नोऽर्थे बोधनक्षमाः।
प्रत्ययाः स्वार्थसंख्यायास्तिङो दशविधाश्च ताः।। शब्दशक्तिप्रका.का-९५, पृ.सं. ३९०

४. शब्दशक्तिप्रकाशिका कारिका ९६, पृ.सं. ३९४

५. धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने।
समर्थः स्वार्थयत्नस्य शब्दो वाऽऽख्यातमुच्यते।।९७।। शब्द.श. प्रका. पृ. ३९५

६. शब्द श. प्रका. पृ. सं. ४०२

७. शब्द श. प्रका.

८. व्युत्पत्तिवादः पृ. ५६५

९. व्युत्पत्तिवादः, सादर्शः पृ. ५९२
१०. तदेव पृ. सं. ५९३
११. शब्द श. प्रका. पृ. ४०८ कारिका १००
१२. लड्लोडन्या विधेर्बोधेसमर्था तिङ् लिङुच्यते।
प्रवर्तकचिकीर्षाया हेतुधीविषयो विधिः।। शब्द श. प्रका. १०१।। पृ. ४१०
१३. शब्द श. प्रका. पृ. ४१७
१४. शब्द श. प्रका. पृ. ४२६
१५. तदेव पृ. ४२७
१६. तदेव पृ. ४२९
१७. शब्द श. प्रका. ।।१०२।। पृ. ४३१
१८. शब्द श. प्रका. पृ. ४३३
१९. व्युत्पत्तिवादः, लकारार्थः., पृ. ६०९
२०. शब्द श. प्रका. ।।१०३।। पृ. ४३३
२१. व्युत्पत्तिवादः पृ. ६०८
२२. व्युत्पत्तिवादः पृ. ६०९ आदर्शटीका।
२३. शब्द श. प्रका. का. १०४ पृ. ४३४
२४. शब्द श. प्रका. पृ. ४३५
२५. व्युत्पत्तिवादः पृ.
२६. व्युत्पत्तिवादः पृ.
२७. व्युत्पत्तिवादः पृ.
२८. शब्द श. प्रका. पृ. ४३६
२९. व्युत्पत्तिवादः पृ. ६०१
३०. शब्द श. प्रका. पृ. ४३६
३१. शब्द श. प्रका. पृ. ४३९
३२. शब्द श. प्रका. कारिकांशः १०७
३३. न्यायकोशः पृ. ७१९
३४. लृट् शेषे च पा.सू. ३/३/१३
३५. वै. सा. ल. पृ. १२८
३६. शब्द श. प्रका., कारिकांशः १०७, पृ. ४३८
३७. शब्द श. प्रका. पृ.
३८. तर्कामृतम् पृ. सं. ११
३९. काशिका पा. सू. ३/३/१३९
४०. रघुनाथमन्दिरपुस्तकालयग्रन्थाङ्कौ, १३५८, ९४० पत्र सं. ५
४१. रघुनाथमन्दिरपुस्तकालयः, जम्मू, ग्रन्थाङ्कौ, १३५८, ९४० पत्र सं. – ५
४२. सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य सरस्वतीभवनपुस्तकालयस्य हस्तलिखितपुस्तकालये अस्य ग्रन्थस्य पाण्डुलिपयः सन्ति।

भवानन्दकृत
दशलकारविचारः

श्रीगणेशाय नमः श्रीभैरवाय नमः। पचति[१] पक्ष्यत्यपाक्षीत्यादौ वर्तमानत्वादि-प्रतीतेर्वर्तमानत्वे लट्त्वादिना वर्तमानप्रागभावप्रतियोगित्वरूपे भविष्यत्वे लृट्त्वादिना वर्तमानध्वंसप्रतियोगित्वरूपेऽतीतत्वे लुङ्त्वादिना शक्तिः न त्वाख्यातत्वेन सर्वत्र सर्वप्रत्ययापत्तेः न तु वर्तमानत्वेन कालसम्बन्धित्वम् अतीतादावतिप्रसङ्गात्। नापि पचतीत्यादि तत्तच्छब्दप्रयोगाधिकरणक्रियादिरूपकालोपाधिवृत्तित्वं तादृशकृते-रतीतत्वादिदशायामपि चैत्रे तादृशक्रियावृत्तिपाककृतिमत्वस्याबाधात् चैत्रः पचतीत्यादि-प्रयोगप्रसङ्गात्।

न च तादृशकृतेर्वर्तमानकालावच्छिन्नसमवायसम्बन्धेनैव विशेष्येऽन्वयः पक्ष्यतीत्यादौ तदभावात्। न च लडादिस्थले पृथक् व्युत्पत्तिः कल्प्यते शक्त्यन्तरे मानाभावात्। एवं वर्तमानप्रागभावप्रतियोगित्वादावपि वर्तमानत्वं दुर्वचम्। अत्र ब्रूमः यथा सर्वनामपदादौ बुद्धिस्थत्वादिधीनियामकं सम्बोध्यत्वोच्चारयितृत्वादिकं तथा पचतीत्यादौ तत्तदाख्यातजन्यवर्तमानकालत्वप्रकारकप्रतीतिविषयतायां तत्तदाख्यात-प्रयोगाधिकरणत्वं नियामकं यथा चोच्चारयितृत्वभ्रमेणानुच्चारयितुरप्यहं पदादिजन्य-धीविषयता तथात्रापि तत्तदाख्यातप्रयोगाधिकरणत्वभ्रमेण वर्तमानक्रियादेरपि शाब्दधीविषयत्वम्। अत एवातीतादेरपि वर्तमानत्वभ्रमेण पचतीत्यादिप्रयोगः। तादृशकालश्च क्रियात्वेन तत्तत्क्रियात्वेन वा भासत इत्यन्यदेतत् सर्वनाम्नामिवानन्त-शक्तिकल्पनागौरवस्यान्याय्यत्त्वात्। यथाच सर्वनामबुद्धिस्थत्वप्रकारावच्छिन्ने शक्त-मित्याकारकशक्तिग्रहेऽपूर्वचैत्रादेः शाब्दधीविषयता तथात्रापि लङाख्यातं स्वप्रयोगा-धिकरणक्रियायां शक्तमित्याकारकशक्तिग्रहेऽपूर्वक्रियाव्यक्तेर्विशिष्यशाब्दधीविषयत्वं शब्दोपस्थित्यनुकूलव्यापार एव प्रयोगः। स च उच्चारणलिप्यादिसाधारणः पूर्वं वर्तमानप्रागभावप्रतियोगित्वादावपि शाब्दधीविषयत्वे पक्ष्यतीत्याख्यातप्रयोगाधिकरणत्वं नियामकम्, अनुवादे तु अनुवक्तुः शब्दप्रयोगाधिकरणकालो भासते। 'श्रीकृष्णो विहरती'ति नन्दाद्युक्तानुवादस्यापि इदानीं शाब्दबोधजनकत्वात् इदानीन्तनकालस्य श्रीकृष्णविहरणानधिकरणत्वात् किन्तु वक्तुस्तादृशप्रयोगाधिकरणकाल एव वर्तमानत्वेन न भासते एवं 'श्रीकृष्णो विहरिष्यती'त्यादावपि बोध्यम्। एवं कविकाव्यादावपि

कवेरभिप्रायविषयबहुप्रयोगाधिकरणकाल एव वर्तमानत्वेन भासत इति अत्र वर्तमानत्वादिकम् अनुकूलकृतिव्यापारार्थकाख्यातस्थले कृतिव्यापारयोरेवान्वेति समानपदोपात्तत्वात्। जानातीत्यादौ[२] धात्वर्थे एवान्वेति 'नश्यति' 'नंक्ष्यति' 'नष्ट' इत्यादौ वर्तमानत्वादिकं न धात्वर्थेऽन्वेति चिरविनष्टादावपि नश्यतीत्यादिप्रयोगप्रसङ्गात् किन्तु वर्तमानानागतातीता चोत्पत्तिः प्रत्ययेन प्रत्याय्यत इति न पचतीत्यादौ वर्तमानत्वं न कृतावन्वेति वर्तमानपाककृतिकालेऽपि तदभावस्य पूर्वकाले सत्त्वात् न पचतीति प्रयोगापत्ते न चाभावस्यापि वर्तमानत्वं भासते तर्हि कृतौ तदन्वयवैयर्थ्यात् निष्पन्नं चिरभाविनं वा 'ओदनं न पचती'त्यादौ तादृश ओदनकर्मकपाकानुकूलवर्तमानकृत्य-प्रसिद्ध्या नञर्थानन्वयप्रसङ्गाच्च। तस्मान्नञर्थे वर्तमानत्वान्वयः। प्राभाकराणां 'न कलञ्जं भक्षयेदि'त्यादौ 'षोडशिनं न गृह्णाती'त्यादौ नञर्थेऽपि विभक्त्यर्थान्वयस्य व्युत्पन्नत्वात् वर्तमानत्वं वर्तमानकालावच्छिन्नत्वं तेन पाकानुकूलकृतिदशायामपि घटादौ वर्तमानस्य तदभावस्य पूर्वकालावच्छेदेन स्वस्मिन् सत्त्वेऽपि न क्षतिः। 'नापाक्षीन्न पक्ष्यती'त्यादौ तु अतीतत्वमनागतत्वञ्च तादृशकृत्यभावे भासते, न तु कृतौ पाकानुकूलातीतकृतेस्तादृशानागतकृतेश्च सत्त्वेऽपि वर्तमानकाले तदभावस्य सत्त्वात् नापाक्षीदित्यादिप्रयोगापत्तेः। भाविदिने नापाक्षीदित्यादौ तु भाविकर्मकपाकानु-कूलातीतकृतेः निष्पन्नान्नं न पक्ष्यतीत्यादौ निष्पन्नकर्मकपाकानुकूलभविष्यत्कृतेश्चा-प्रसिद्ध्या नञर्थानन्वयप्रसङ्गाच्च। अतीतत्वमनागतत्वञ्च अतीतानागतकालावच्छिन्नत्वं न तु वर्तमानध्वंसप्रागभावप्रतियोगित्वमत्यन्ताभावे तदसम्भवात्। ध्वंसप्रागभाव-योस्तत्सम्भवेऽपि तद्बोधे प्रयोगनियमानिर्वाहात्। अन्यथाऽनागततादृशकृतेः सत्त्वे एव न पक्ष्यतीति स्यात्, तदैव तादृशकृतिध्वंसस्य प्रागभावप्रतियोगित्वात्। एवमतीतादिकृतिसत्त्वे एव नापाक्षीदिति स्यात्तदैव तादृशकृतिप्रागभावस्य वर्तमानप्रागभावप्रतियोगित्वात्तदित्थञ्च नापाक्षीदित्यादावतीतकालावच्छिन्नतादृश-कृत्यभाववानिति 'धी नंक्ष्यती'त्यादौ चानागतकालावच्छिन्नतादृशकृत्यभाववानिति धीः वर्तमानसामीप्यमपि क्वचिल्लङर्थः वर्तमानसामीप्ये वर्तमानवद्वेति पाणिनिसूत्रात् वर्तमानसामीप्यं चातीतानागतसाधारणं तच्च भविष्यद्वृत्ति-वर्तमानध्वंसोत्पत्तिक-क्षणोत्पत्तिकक्रियादिवृत्तित्वरूपं 'कदा यास्यसी'त्युक्ते 'एष गच्छामी'त्यादावाद्य[३] 'कदा आगतोऽसी'ति पृष्टे 'एष आगच्छामी'त्यादावन्त्य[४] प्रतीयते तदपि वर्तमानत्वादि-वत्कृतावन्वेति एवञ्च निरुक्तवर्तमानसामीप्याश्रयगमनानुकूलकृतिमानहमित्या-कारकोऽन्वयबोधः। लुङो वर्तमानध्वंसप्रतियोगित्वरूपमतीतत्वमर्थः। तथाचाह शेषो निशायाः प्रहरो गतायाः आगामिनीयप्रहरश्च तस्याः दिनस्य चत्वार इमे च यामाः कालं बुधास्त्वद्यतनं वदन्ति एतद्दिनपदेन तावानेव अर्थः विवक्षितः। अनद्यतने लङ् इति पाणिनिसूत्रात् तद्दिनञ्च शब्दप्रयोगाधिकरणं ग्राह्यं, न तु शाब्दबोधाधिकरणम्। शब्दप्रयोगाधिकरणीभूतातीतस्यापि भाविदिनादिवृत्तिशाब्दबोधापेक्षया अनद्यतने लङः

प्रयोगापत्तेः। लिट् च परोक्षत्वे सत्यतीतत्वं परोक्षत्वं च तदवक्तृभिन्नकर्तृकत्वं तच्च क्रियान्वयि अत एव मैत्रसमक्षं चैत्रेण गमने कृते 'चैत्रो जगाम' इति वाक्येना-साधुत्वं न वा स्वयं कृतगमनादेः स्वपरोक्षत्वेऽहं जगामेति प्रयोगः। चित्तविक्षेपादौ कर्त्रपरोक्षेऽपि लिट् साधु यथा 'सुप्तोऽहं किल विललापे'त्यादौ एवमत्यन्तामपह्नवेऽपि यथा 'कलिङ्गो दृष्टोऽस्ति त्वये'ति केनचित् पृष्ठे तमपह्नोतुं 'नाहं कलिङ्गं जगामेति' तदपह्नवश्च तदप्रतिपत्त्यनुकूलः शब्दः, तस्य चात्यन्तिकत्वं प्रश्नविषयविपरीतमनुक्ता तदुपपादकविपरीतकथनं प्रकृतेर्दशनविषयतया दृष्टोऽस्तीति प्रश्नविषयः तद् विपरीतं न दृष्टोऽस्ति इत्यनुक्ता तदुपपादक ..... लिङ्गगमनस्याभावकथनम्। इदन्तु बोध्यमद्यतनत्वं परोक्षत्वम् अत्यन्तापह्नवश्च न तत्तत्प्रत्ययशक्यः न वा तत्तद् पदजन्यशाब्दधीविषयः किन्त्वहमादिपदे उच्चारयितृत्वादिवत् स्वरूपसदेव तत्तत्प्रत्यया-धीनधीनियामकं शाब्दबोधविषयश्चातीतत्वमेव, अन्यथात्यन्तापह्नवस्य शाब्दधी-विषयत्वेऽपह्नवत्वव्याघातादिति दिक्। लृटो लुटश्च भविष्यत्वमर्थः। तच्च वर्तमान-प्रागभावप्रतियोगित्वरूपं एवञ्च 'पक्ष्यति' पक्ते'त्यादौ च पाकानुकूलवर्तमानप्राग-भावप्रतियोगिकृतिमानित्याकारकः शाब्दबोधः।

ननु पाकानुकूलं यत्किञ्चित् कृतिकाले पचतीति प्रयोगवत् यत्किञ्चित् तादृशकृतेरतीत्वदशायां भविष्यत्तादृशायाञ्च वापाक्षीत् पक्ष्यतीति प्रयोगापत्तिः। न च तादृशकृतित्वावच्छेदेनातीतत्वादेरन्वयान्नैष दोष इति वाच्यम्। तथा सत्यपाक्षीत् पक्ष्यती'त्यादि न स्यात् तादृश यावत् कृतिध्वंसप्रागभावयोरिवेदानीमसत्त्वात्। न च प्रकृतपाकानुकूलकृतित्वावच्छेदेन तथान्वय इति वाच्यम्, तथा सत्यपाक्षीदित्यादौ सर्वत्र धातौ प्रकृतपाके क्षणापत्तेः। अत्र ब्रूमः पक्ष्यतीत्यादौ तत्पाकतात्पर्यकधातुसमभिव्याहृतेन लृङादिप्रत्ययेन जन्ये वर्तमानप्रागभावत्वप्रकारकबोधे लुङादिप्रत्ययेन जन्ये च तादृशवर्तमानध्वंसत्त्वप्रकारकबोधे तत्तत् पाकीयाद्यकृतिप्रागभावत्वज्ञानं तत्तत्पाकीय-चरमकृतिध्वंसत्वज्ञानं च नियामकं किं वा तादृशप्रत्ययजन्यवर्तमानप्रागभाव-प्रतियोगित्वज्ञाने तादृशध्वंसप्रतियोगित्वज्ञाने वा तत्पाकीयाद्यकृतित्वप्रकारकज्ञानं तत्पाकीयचरमकृतित्वज्ञानं च हेतुः, अत एव मध्यमकृतेराद्यत्वचरमत्वभ्रमदशायां 'पक्ष्यति' 'अपाक्षीदित्या'दितो कदाचिदन्वयधीः पक्ष्यतीत्यादावनन्यगतिकतया धातोः प्रकृतपाके लक्षणा तथा च प्रकृतपाकानुकूलवृत्तित्वावच्छेदेन तादृशध्वंसप्रागभाव-प्रतियोगित्वबोधस्य व्युत्पन्नत्वात् मध्यमदशायां न प्रयोग इति मिश्रानुयायिनः क्रियातिपत्तौ लृङः भविष्यत्वं हेतुहेतुमद्भावोऽतिपत्तिश्चार्थः लिङ निमित्ते लृङ् क्रियातिपत्तौ इति पाणिनिसूत्रस्वरसात्। लिङनिमित्ते हेतुहेतुमद्भावे, स च क्रियान्वयि, भविष्यत्वञ्च कृत्यर्थकाख्यातस्थले कृतावाश्रयत्वार्थकस्थले च धात्वर्थेऽन्वेति क्रियाया अनिष्पत्तिश्चातिक्रमेण यतनं सम्भावनम्। यद्देशे यत् काले च क्रियायाः

सम्भवस्तदन्यस्मिन् देशे काले च सम्भावनं प्रसञ्जनमिति यावत्, तच्च सम्भावनं उत्कटकोटिकसंशयः ..... चाहार्यज्ञानं, तत्र च धात्वर्थः प्रकारतया प्रथमान्तार्थश्च विषयतयाऽन्वेति। यथा यदि सहस्रसमाः जीविष्यं तदा पुत्रशतमजनिष्यं, यदि शब्दस्यानिर्द्धारणं कालविशेषश्चार्थः स च क्रियान्वयि। द्वितीयाश्चात्यन्तसंयोगो व्यापकत्वञ्च निरूढलक्षणार्थः। तथा चानिर्द्धारितकालविशेषः वृत्तिभविष्यद्हेतुभूतसहस्र-व्यापकजीवनप्रकारकसम्भावनाविषयोऽहं तत्कालीनभविष्यत्कार्यीभूतशत-पुत्रकर्मकोत्पत्त्यनुकूलव्यापारप्रकारकसम्भावनाविषयः। अत्र च वर्षसहस्रजीवित्वस्य स्वस्मिन् बाधावतारे प्रसक्तिरेव सम्भावनं तदनवतारे संशय एव तदिति। एवं भूतेप्युक्तरूपार्थे लृङ् 'शिला कोमला अभविष्यन् तदा क्रोष्टुभिरेव अभक्षयिष्यन्'। अत्र च यदि शब्दस्यासत्त्वं कालविशेषश्चार्थः। लृङश्चातीतत्वं हेतुहेतुमद्भावो प्रसञ्जनं चार्थः। असत्त्वं चाभावप्रतियोगित्वम्। तच्च धात्वर्थेऽन्वेति। अभावे च प्रथमान्तार्थो अधिकरणत्वेनान्वेति। एवं शिलाः स्ववृत्त्यभावप्रतियोगिहेतुभूतातीत-कोमलीभवनप्रकारकप्रसञ्जनविषयास्तत्कालीनक्रोष्टुवृत्यतीतकृतिजन्यकार्यीभूत-भक्षणकत्वेन प्रसञ्जिताः। एवं 'यद्ययं निर्वह्निः स्यात्तदा निर्धूमः स्यादि'ति तर्के यदि शब्दस्यानिर्द्धारणं कालविशेषश्चार्थः लिङः वर्तमानत्वं प्रसञ्जनं चार्थः, तथाच पर्वते अनिर्द्धारितकालविशेषवृत्तिवर्तमाननिर्वह्नित्वसत्ताप्रसञ्जनविषयस्तत्कालीनवर्तमाननिर्द्धूम-सत्ताप्रसञ्जनविषय इत्यन्वयबोधः। परे तु क्रियातिपत्तिस्थले आहार्यम् एव शाब्दबोधः 'यदि च वर्षसहस्रमजीविष्यं पुत्रशतमजनिष्यमि'त्यादावयोग्यतानिश्चयसत्त्वेप्य-निर्द्धारितकालविशेषवृत्तिभविष्यद्धेतुभूतवर्षसहस्रजीवित्ववानहं तत्कालीनभविष्य-त्कार्यीभूतपुत्रशतोत्पन्नानुकूलव्यापारवानहमित्यन्वयधीराहार्यज्ञानरूपा एव 'यदि शिलाः कोमला अभविष्यन्' 'निर्वह्निः स्यादि'त्यादौ अयोग्यतानिश्चयसत्त्वे आहार्यबोधः स्यात्। इष्टत्वात् भवेद् साकांक्षपदवत् तादृशलिङादिपदसमभिव्याहार एव तन्नियामकः। यदि च दोषविशेषाद्यजन्यानाहार्यतज्जन्यत्वापेक्षया तच्छाब्दत्वादेर्लघुत्वात्तदवच्छिन्नं प्रत्येव योग्यतानिश्चयादेः प्रतिबन्धकत्वस्वीकारान्नाहार्यशाब्दबोध इत्युपेयते तदा क्रियातिपत्तौ तर्के च पदार्थोपस्थितिमात्रं न तु शाब्दधीः अनन्तरं तादृशोपस्थितिलाघव-प्रतिसन्धानेन मानस एव तादृशात्मिको बोधः। यथा शब्दो नित्यो न वेति विप्रतिपत्तिवाक्यात् पदार्थोपस्थितौ मानसः संशयः, लिङनिमित्ते लृङ्क्रियातिपत्तौ इत्यनुशासनं तु तादृशापत्तिः। तात्पर्यस्थले लृङसाधुरित्येवमित्याहुः।

अन्ये तु क्रियातिपत्तिप्रसक्तक्रियाया अभावे लक्षणया धातोस्तादृशक्रियाया अभावबोधे यदि शब्दस्तात्पर्यग्राहकः हेतुहेतुमदभावमत्वं यथायथं अतीतत्वमनागतत्वञ्च लृङर्थः, तच्चाभावान्वयि। एवञ्च यदि शिला इत्यादौ अतीतकालसम्बन्धि-हेतुभूतकोमलीभवनाभाववत्यः शिलाः क्रोष्टुवृत्तिजन्यातीतकालसम्बन्धजन्यभूत-भक्षणकर्मत्वाभाववत्यः इत्यर्थ इति बोधः। एवञ्च कोमलीभावनाभावहेतुकः शिलायाः

क्रोष्टुकर्तृकभक्षणाभाव इति पर्यवसितोऽर्थः। एवं वर्षसहस्रमित्यादावनागत-कालसम्बन्धित्वविषयकः। तथा चानागतकालसम्बन्धिवर्षसहस्रीयजीवित्वाभावहेतु मम पुत्रशतोत्पादकत्वाभाव इति पर्यवसितोऽर्थः। यद्ययं निर्वह्नित्वसत्त्वाभावस्य वह्निपर्यवसितस्यानुमित्युत्पत्तिप्राक्काले पक्षे अनिर्णीतत्वेन तत्कालावतीर्णतर्कबोधक-प्रकृतवाक्यस्य तत्काले बोधप्रसङ्गादिति। तच्चिन्त्यम्। चिन्ताबीजन्तु आपत्तिवाक्यादि-वद्बाधनिश्चयकाले यद्यसम्भावनाविषयबोधस्य सर्वानुभवसिद्धत्वात्। यदि च 'त्वं गच्छे' इत्यादि शब्दोऽपि याञ्चा तदान्यकर्तृकत्वेनेच्छाविषयक्रियावबोधकशब्द एव याञ्चा बोध्या। 'लभेय भिक्षा'मित्यादौ तु निरुक्तयाञ्चाया स्वविषयीभूतदानप्रयुक्तत्व-सम्बन्धेन लाभेऽन्वयः। भिक्षापदञ्च याञ्चा विषयपरम्। एवञ्च भिक्षाकार्यक-निरुक्तयाञ्चाविषयीभूतदानप्रयुक्तलाभाश्रयत्ववानित्यन्वयबोधः।

केचित्तु 'लभेय भिक्षामि'त्यादौ विधेरिच्छाविषयत्वमेवार्थः भिक्षापदस्य याच-नीयार्थकत्वात्। तादृशेच्छायायाः याञ्चा परत्वम्। एवञ्च याञ्चाया आज्ञादि-साधारणत्वामदाणत् विजातीयेच्छैव सर्वत्र याञ्चापदार्थः आज्ञानुज्ञाशंसादिरपि विजातीयेच्छा। समिधमहारेत्यादौ समिदादिज्ञानविषयसमित्कर्मकाहरणानुकूलकृतिमांस्त्वमित्यन्वयबोधः।

।। इति भवानन्दकृतिः ।। संवत् १७८८ ।।

---

१. वर्तमानकालिकपाकानुकूलकृतिमान् यद्वा स्वप्रागभावानधिकरणस्वाश्रयकर्तृकप्रकृतक्रियानाश-प्रागभावाधिकरणशब्दप्रयोगाधिकरणकालिकपाकानुकूलकृतिमानिति शाब्दबोध इति।

२. वर्तमानकालिकं यज्ज्ञानं तद्वानिति शाब्दबोधः।

३. वर्तमानक्षणोत्तरकालावच्छेद्यगमनानुकूलकृतिमानहमिति बोधः।

४. वर्तमानक्षणाव्यवहितप्राक्कालावच्छेद्यागमनवानहमिति इति शाब्दबोधः।

५. "पक्ष्यति" इत्यनेन पाकानुकूलवर्तमानप्रागभावप्रतियोगिकृतिमान् इति शाब्दबोधो जायते भवानन्दतर्कवागीशनये, "पक्ता" इत्यस्यापि बोधो तदेव भवति।

परिशिष्टम्

(लघुग्रन्थे समागतानां ग्रन्थानां मतानां सूत्राणाञ्च विवरणम्)

१. वर्तमानसामीप्ये वर्तमानवद्वा।। पा.सू. ३.३.१३१

सि.कौ. सूत्र सं. २७८९, दशलकारविचारः पृ. सं. २०

वृत्तिः – समीपमेव सामीप्यम्। स्वार्थे ष्यञ् वर्तमाने लट् (सू. २१५१) इत्यारभ्य "उणादयो बहुलम्" (सू. ३१६९) इति यावद् येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्तमानसमीपे भूते भविष्यति च स्युः। (सि. कौ. मू. पृ. सं. २८८)

२. अनद्यतने लङ् । पा.सू. ३.२.१११ सि. कौ सू.सं. २२०५, दशलकारविचारः पृ.सं. २०

वृत्तिः– अनद्यतनभूतार्थवृत्ते धातोर्लङ् स्यात्।

३. मिश्रानुयायिनः पृ. सं. २२ (दशलकारविचारः)

४. लिङ्निमित्ते लृङ् क्रियातिपत्तौ । पा.सू. ३.३.१३९

सि. कौ सू. सं. २२२९, (दशलकारविचारः) पृ. सं. २२

वृत्तिः – हेतुहेतुमद्भावादि लिङ्निमित्ते तत्र भविष्यत्यर्थे लङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम्। वै.सि.कौ.मूलमात्रम्, पृ.सं. १९२

५. परे तु पृ. सं. (७) २३

६. इत्याहुः पृ. सं. (८) २४

७. अन्ये तु पृ. सं. २४ (८)

८. केचित्तु पृ. सं. २६ (१०)